# D.A.V. PUBLIC SCHOOL, NEW PANVEL

**Plot No. 267, 268, Sector-10, New Panvel,**
**Navi Mumbai-410206 (Maharashtra).**
**Phone 022-27468211, 27451793, Tel-fax-27482276,**
**E-mail – davnewpanvel@gmail.com, www.davnewpanvel.com**


## PRACTICE PAPER FOR SUMMATIVE ASSESSMENT – I
## 2014-2015
## STD:- IX

**Sub: - Sanskrit** **Time:- 3 Hours** **Marks:- 90**

........................................................................................................................

निर्देश ः

क) परीक्षापत्रे चत्वारः खण्डाः सन्ति।

| | | |
|---|---|---|
| खण्ड क | अपठित अवबोधनम् | 10 अंक |
| खण्ड ख | रचनात्मक लेखनम् | 15 अंक |
| खण्ड ग | अनुप्रयुक्त व्याकरणम् | 30 अंक |
| खण्ड घ | पठित अवबोधनम् | 35 अंक |

ख) सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।

ग) प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।

घ) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।

........................................................................................................................

## खण्ड 'क'
## अपठित अवबोधनम्

**क.1) अधोलिखितं अनुच्छेदं पठित्वा प्रदत्त प्रश्नानाम् उत्तराणि लिखत।**

प्रत्येकं कार्यस्य समयः निश्चितः वर्तते। प्रथमः बाल्यकालः विद्यायाः उपार्जनाय निश्चितः अस्ति द्वितीयः यौवनकालः धनार्जनाय, तृतीयः वार्धक्यस्य आरम्भकालः पुण्यं कर्तुं निश्चितः वर्तते। एषु कालेषु यः मनुष्यः उचितं कार्यं न सम्पादयतिः, सः चतुर्थे वयसि किं करिष्यति? वृद्धः भूत्वा किमपि कर्तुम् असमर्थः भवति अतः बुद्धिमद्भ्यः छात्रेभ्यः इदम् उचितं यत् ते समये समस्तं कार्यं कुर्वन्तु क्षणम् अपि कालं व्यर्थं न यापयन्तु। इत्थं करणेन यथावसरं ते विद्वांसः भविष्यन्ति, संसारे उन्नतिं कृत्वा यशः धनं च लब्ध्वा सुखिनः भविष्यन्ति।

**(क) एकपदेन उत्तरत।** **(2)**

1 प्रत्येकं कार्यस्य किम् निश्चितः वर्तते?

2 यौवनकालः किमर्थम् भवति?

**(ख) पूर्णवाक्येन उत्तरत।** **(2)**

1 छात्राः किं कृत्वा सुखिनः भविष्यन्ति?

2 कस्मिन् वयसि वृद्धः भवति?

**(ग) भाषिक कार्यम्।** **(4)**

1 'वर्तते' इति क्रियापदस्य कर्तृपदं किम्?

(i) समयः (ii) प्रत्येकम् (iii) कार्यस्य (iv) निश्चितः

2 'ते' इति सर्वनामपदं कस्मै प्रयुक्तम्?

(i) समयाय (ii) छात्रेभ्यः (iii) मनुष्या (iv) कार्येभ्यः

3 छात्रेभ्यः इति विशेष्यपदस्य विशेषणपदं किम्?

(i) असमर्थः (ii) विद्वांसः (iii) सुखिनः (iv) बद्धिमद्भ्यः

4 पण्डिताः' इति अर्थे किं पदं प्रयुक्तम्?

(i) विद्वांसः (ii) छात्रेभ्यः (iii) यशः (iv) वयः

(घ) अस्य अनुच्छेदस्य कृते समुचितं शीर्षकं लिखत। (2)

<u>खण्ड 'ख'</u>

<u>रचनात्मक लेखनम्</u>

ख.1) चित्रं दृष्टवा पञ्च वाक्यानि संस्कृते लिखत। (10)



(मञ्जूषा - बसयानम्, कारयानानि,स्कूटरयानेन,मटोयानम्,स्तम्भाः, जनाः, वाहनानि, वृक्षाः,उपरि,अधः, पृष्ठे , गच्छन्ति, मार्गः, सेतोः, तीव्रगत्या, शीघ्रम्, विद्युतस्तम्भाः)

<u>अथवा</u>

मञ्जूषातः उचितानि पदानि चित्वा 'देशभक्तिः'विषये पञ्चवाक्यानि रचयत।

(मञ्जूषा - आदरस्य, मनुष्याणाम्,अस्मान्,कर्तव्यम्,मनसा, कुर्याम, गरीयसी, जननी,देशस्य,पोषयति, मातृभूमिः, रक्षाम्)

ख.2) भवान् लोकेशः! भवतः मित्रं सुरेशः चण्डीगढ़ नगरे नवोदय विद्यालयस्य छात्रावासे वसति। सः अस्वस्थः अस्ति। स्वास्थ्यरक्षणाय तं प्रति लिखितेपत्रे रिक्तस्थानानि मञ्जुषायाः सहायतया पूरयित्वा पत्रं लिखतु। (5)

दिल्लीतः
दिनांक : **22.08.2013**

प्रिय **1** _______

सस्नेहं नमस्ते।

भवतः पत्रात् मया ज्ञातम् यत् त्वम् **2** ______ अस्वस्थः असि। अहम् **3** ______ सह तव विषये चर्चाम् अकरवम्। मम पितृमहोदयः **4** _____ अस्ति। तेन स्वास्थ्यरक्षणाय ये निर्देशाः दत्ताः तान् अहम् लिखामि। प्रतिदिनम् भ्रमणम् **5** _____ च कुरु। यावत् **6** ______ अनुभूतिः न भवेत्, भोजनम् न कर्तव्यम्। भोजनेन सह जलं न पातव्यम्। प्रतिदिनं **7**______ जलं पातव्यम्। अन्यत् सर्वं **8**______। समये समये **9** ________त्वया अवश्यं सूचनीयम्।

भवताम् अभिन्नहृदयः
**10** ______

(मञ्जूषा - स्वास्थ्यविषये, क्षुधायाः, व्यायामं,सुरेशः , पर्याप्तम्,गतसप्ताहात्,स्वपित्रा,प्राकृतिक चिकित्सकः, कुशलं, लोकेशः, )

## खण्ड 'ग'
## अनुप्रयुक्त व्याकरणम्

ग.1 अ)निर्देशानुसारं उत्तरतम्। (4)

**1** अयं वर्णः कवर्गे नास्ति ।

(i) त् (ii) क् (iii) ह् (iv) ख्

**2** अस्य उच्चारणस्थानं तालुः अस्ति।

(i) त् (ii) स् (iii) च् (iv) घ्

**3** उचितं वर्ण वियोजनं कृत्वा रिक्तस्थानपूर्तिं कुरूत।

कीर्तिम् = क्+ _ +र्+_+इ+ म्

**4** उचित वर्णसंयोजनं चिनुत।

अ +व्+ आ+ प्+ स्+ य्+ अ +स्+ इ

(i) अवाप्स्यसि (ii) अवाप्स्यासि (iii) अवापस्यासि (iv) अवाप्स्यसि

ग.2 ) अधोलिखित वाक्येषु रेखांकितपदेषु सन्धिं सन्धिविच्छेदं वा कुरूत। (5)

**1** सः <u>अत्याचारं</u> करोति।

(i) अति+आचारम् (ii) अति+ आचारः (iii) अती +आचारम् (iv) अति +अचारम्

**2** <u>तत् +चिन्तयित्वा</u> सः कथयति।

(i) तच्चीन्तयित्वा (ii) तच्चिन्तयित्वा (iii) तदच्चिन्तयित्वा (iv) तम्च्चिन्तयित्वा

**3** <u>रजनीशः</u> आकाशे विराजते।

(i) रजनी+ ईशः (ii) रजनि+ ईशः (iii) रजनी+ इशः (iv) रजनि+ इशः

**4** <u>काष्ठादग्निः + जायते</u> ।

(i) काष्ठादग्निर्जायते (ii) काष्ठादग्निजायते (iii) काष्ठादर्ग्निजायते (iv) काष्ठादग्निजयते

**5** तत्र <u>चं</u> +<u>पकः</u> अस्ति।

(i) चम्पकम् (ii) चंपकम् (iii) चम्पकः (iv) चंपकः

ग.3 ) अधोलिखितान् उचितविभक्तियुक्तं पदं चित्वा वाक्यपूर्तिः क्रीयताम् । **(5)**

**1** द्वौ ________ अगच्छताम्।

(i) मुनिः (ii) मुनीनाम् (iii) मुनी (iv) मुने

**2** बालः ________ निकषा गच्छति।

(i) माता (ii) मातरम् (iii) मात्रा (iv) मात्रे

**3** वृक्षात् ________ पततः।

(i) फलानि (ii) फलेन (iii) फले (iv) फलम्

**4** ________ किं किं न प्राप्यते।

(i) भूमिः (ii) भूमेः (iii) भूमौ (iv) भूम्या

**5** ________ ईश्वरस्य कृपा अस्ति।

(i) मया (ii) अस्मान् (iii) मम (iv) अस्मासु

ग.4) अधोलिखित वाक्येषु उचित क्रियापदानि योजयित्वा वाक्यानि पूरयत। **(5)**

**1** तौ गुरूम् ________ ।

(i) सेवते (ii) सेवेते (iii) सेवामहे (iv) सेवे

**2** त्वं ह्यः पुरस्कार________ ।

(i) अलभथाः (ii) अलभे (iii) अलभसे (iv) अलभत

**3** अहम् एतत् कार्यं कर्तुं________ ।

(i) शक्नोमि (ii) शक्नोति (iii) शक्नुमः (iv) शक्नोषि

**4** दुष्टाः सर्वम् एव ________।

(i) नंक्ष्यति (ii) नस्यन्ति (iii) नंक्ष्यन्ति (iv) नंक्ष्यथ

**5** आचार्यः असत्यवादिने शिष्याय ________।

(i) अक्रुध्य (ii) अक्रुध्यत् (iii) अक्रुध्यत (iv) अक्रुध्यन्

ग.5) अधोलिखित वाक्येषु कोष्ठकगत शब्दं आधृत्य उचित उपपदविभक्ति प्रयोगेन पूरयत। **(5)**

**1** बालकः सर्वदा ________ पृष्ठतः तिष्ठति ।

(i) पितरम् (ii) पित्रा (iii) पितुः (iv) पितरि

**2** ________ विना वसन्तस्य शोभा कुतः।

(i) पिकाय (ii) पिकस्य (iii) पिकात् (iv) पिके

3 भारतीयमासानां चैत्रः________ पूर्वः भवति।

(i) वैशाखात् (ii) वैशाखः (iii) वैशाखस्य (iv) वैशाखेन

4 ________ उभयतः सुन्दराः वृक्षाः शोभन्ते।

(i) सरणिम् (ii) सरणेः (iii) सरणिः (iv) सरणौ

5 तेन ________ किम् यत् सन्देहं जनयति।

(i) पुस्तकम् (ii) पुस्तकेन (iii) पुस्तकस्य (iv) पुस्तकाय

ग.6 अ) प्रत्यय संयोजनं विच्छेदं वा कृत्वा लिखतु। (6)

1 उद्याने क्रीडित्वा (___ +___) इमे छात्राःगृहम् गच्छन्ति।

2 वयम् गृहं ________ इच्छामः। (गम् + तुमुन्)

3 त्वं विचिन्त्य एव कार्यं कुरू (___ +___+___ )।

4 मम पुत्रः शीतलं जलं _______अगच्छत्। (पा + क्त्वा)

5 मोहनः ईश्वरं _______प्रातः एव उत्तिष्ठति। (स्मृ + तुमुन्)

6 धनं प्राप्य के न मोदन्ते। (___ +___+___ )।

## खण्ड 'घ'

## पठित अवबोधनम्

घ.1 अ) अधोलिखितं गद्यांशं पठित्वा प्रश्नान् उत्तरत।

न अनृतं ब्रूयात्।न अति ब्रूयात् ।न अन्यस्वम् आहरेत्।न वैरं रोचयेत्। न कुर्यात् पापम् ।न पापेऽपि पापी स्यात्।न अन्यदोषान् ब्रूयात्।न अन्यरहस्यम् आगमयेत्।अधार्मिकैः न दुष्टैः सह आसीत्। न नासिका कुष्णीयात्। न दन्तान् विघट्टयेत्।न भूमिं विलिखेत्। न नखाम् वादयेत्।न छिन्द्यात् तृणम्। न दुष्टयानानि आरोहेत्। न द्रुमम् आरोहेत्। न जलोग्रवेगम् अवगाहेत्।

(क) एकपदेन उत्तरत। (1)

1 किम् न रोचयेत् ?

(ख) पूर्णवाक्येन उत्तरत। (2)

1 कैः सह न आसीत् ?

(ग) भाषिक कार्यम्। (2)

1 साकम् इत्यस्मिन् अर्थे किम् अव्ययपदम् अत्र प्रयुक्तम् ?

(i) अन्य (ii) सह (iii) न (iv) अति

2 'ब्रूयात्'अत्र कः लकारः ?

(i) लोट् (ii) विधिलिंग (iii) लट् (iv) लृट्

ब) अधोलिखित पद्यांशं पठित्वा प्रश्नान् उत्तरत।

गौरवं प्राप्यते दानात् न तु वित्तस्य सञ्चयात्।
स्थितिरूच्चैः पयोदानां पयोधीनामधः स्थितिः।।

(क) एकपदेन उत्तरत। (1)

1 वित्तस्य सञ्चयात् किं न प्राप्यते ?

(ख) पूर्णवाक्येन उत्तरत। (2)

1 केषां स्थितिः उच्चैः?

(ग) भाषिक कार्यम्। (2)

1 'स्थितिरूच्चैः' अत्र सन्धिच्छेदं कुरूत?

(i) स्थिति + रूच्चैः (ii) स्थितिरू +उच्चै (iii) स्थितिः + उच्चैः (iv) स्थितिः + रूच्चै

2 'सञ्चयात्' अत्र का विभक्ति प्रयुक्ता?

(i) प्रथमा (ii) तृतीया (iii) चतुर्थी (iv) पञ्चमी

स) संवादं पठित्वा प्रश्नान् उत्तरत।

लक्ष्मणः - एहि एहि! आयुष्मान् भव (सुमन्त्रं वीक्ष्य) तात! कः अत्रभवान् ?
सुमन्त्रः - कुमार! अयम् भरतः कुमारः ।
लक्ष्मणः - एहि एहि इक्ष्वाकुकुमार ।वत्स ! आयुष्मान् भव ।
भरतः - अनुग्रहीतोऽस्मि. ।
लक्ष्मणः - कुमार इह तिष्ठ ! त्वदागमनम् आर्याय निवेदयामि।
भरतः - आर्य अचिरम् इदानीम् अभिवादयितुमिच्छामि।शीघ्रम् निवेद्यताम्।
लक्ष्मणः - बाढम्। (उपेत्य) जयतु आर्यः।आर्य!

(क) एकपदेन उत्तरत। (1)

1 भरतः कम् अचिरम् अभिवादयितुम् इच्छति ?

(ख) पूर्णवाक्येन उत्तरत। (2)

1 लक्ष्मणः सुमन्त्रम् वीक्ष्य किम् अकथयत्?

(ग) भाषिक कार्यम्। (2)

1 'वीक्ष्य' इति पदस्य किम् पर्याय पदम् अत्र प्रयुक्तम् ?

(i) श्रुत्वा (ii) गत्वा (iii) दृष्ट्वा (iv) कृत्वा

2 'आर्याय निवेदयामि' इति आर्याय पदम् कस्मै प्रयुक्तम् ?

(i) भरताय (ii) सुमन्त्राय (iii) रामाय (iv) सीतायै

घ.2) अन्वयः रिक्तस्थानपूर्तिः कुरूत। (4)

भवन्ति नम्रास्तरवः फलोद्गमैः
नवाम्बुभिरिबिलम्बिनो घनाः।
अनुद्धताः सतपुरूषाः समृद्धिभिः
स्वभाव एवैष परोपकारिणाम्।।

अन्वय – फलोद्गमैः तरवः 1 _____ भवन्ति 2_______ घनाः भूरि
विलम्बिनः3_____सतपुरुषाः अनुद्धताः, एषः 4 _____स्वभावः एव।

घ.3) अधोलिखित पंक्त्योः भावार्थं मञ्जूषातः उचितपदानि चित्वा लिखत। (4)

1 कीटोऽपि सुमनः सङ्गादारोहति सतां शिरः।
अस्मापि याति देवत्वम् महद्भिः सुप्रतिष्ठितः।।
भाव – पुष्पैः सह तुच्छजीवः 1 _____ अपि सज्जनानां शिरः आरोहति अनेन प्रकारेण मूर्खः अपि
2 _____ भवितुम् शक्नोति। यथा 3_____जनैः मन्दिरे 4________अश्मः अपि देवत्वं प्राप्नोति।
( महद्भिः ,सुप्रतिष्ठितः ,कीटः, विद्वान्)

घ.4) प्रश्ननिर्माणं कुरूत।

1 रामः सारवताम् सन्निदर्शनम् अस्ति। (4)
2 एकः चन्द्रः तमः हन्ति।
3 पित्रा दुष्करं कृतम्।
4 दधि नक्तम् न भुञ्जीत।

घ.5) घटनाक्रमानुसारम् निम्नलिखितपदानि पुनः लिखत ः- (4)

1 तत्पश्चात् ब्राहमणः राज्ञा श्राध्दार्थ निमन्त्रितः।
2 नकुलः बालसमीपम् उपसर्पन्तम् सर्प दृष्ट्वा खण्डशः कृतवान।
3 क्रुध्द्वा सः नकुलं व्यापादितवान्।
4 बालकं सुस्थं नकुलं च मृतं दृष्ट्वा ब्राहमणः विषादम् अगच्छत्।
5 उज्जयिन्यां माधवः नाम एकः विप्रः वसति स्म।
6 ब्राहमणः नकुलं बालरक्षार्थ व्यवस्थाप्य अगच्छत्।
7 माधवस्य भार्या विप्रं बालस्य रक्षार्थं अवस्थाप्य स्नातुं गता।
8 गृहम उपावृत्तः ब्राहमणः रक्तविलिप्तं नकुलं दृष्ट्वा 'बालकः' अनेन खादित इति चिन्तितवान्।

घ.6) अधोलिखितानां पदानां कोष्टकेभ्यः शुध्दम् अर्थ चित्वा लिख ः- (4)

| | | | | | |
|---|---|---|---|---|---|
| 1 | अधुना | (साम्प्रतम् / पुरा) | 5 | सत्वरं | ( तीव्रम् / शीघ्रम्) |
| 2 | अणिम्नः | (स्थूलम् / सूक्ष्मात्) | 6 | तरूः | (महीभूत / वृक्षः) |
| 3 | आपः | (वर्षा / जलम्) | 7 | पयोदः | (सागर / मेघः) |
| 4 | यदि | (तदा / चेत्) | 8 | सकाशम् | (गत्वा / समीपम्) |